## अष्टादशः पाठः

# प्रियदर्शिनी इन्दिरा

अस्माभिः प्रियदर्शिन्याः इन्दिरायाः दर्शनमनेकधा कृतम्। कोटिजनैः तस्या ऊर्जस्वलानि भाषणानि श्रुतानि। सहस्रैः बालकैः तस्याः हस्ताभ्यां सस्नेहं प्रदत्ताः पुष्पमालाः गृहीता अतः दिवङ्गतापि सा देवी अस्माकं कृते वर्तमानेवास्ति।

तस्याः जन्म प्रयागनगरे 1917 तमे ख्रिस्ताब्दे आनन्दभवननामके पैतृकगृहे अभवत्। जवाहरलालनेहरुः तस्याः पिता कमलानेहरु च जननी अभवत्।

इन्दिरायाः प्रारम्भिकी शिक्षा प्रयागे पूनानगरे चाभवत्। तेषु दिवसेषु आनन्दभवनं स्वतन्त्रतान्दोलनस्य केन्द्रमासीत्। सर्वे राष्ट्रियाः नेतारः तत्रागच्छन्। इन्दिरा तेभ्यः देशभक्तेः सङ्घर्षशीलतायाश्च संस्कारानगृह्णात्। प्राथमिकीं शिक्षां समाप्य सा शान्तिनिकेतनमगच्छत्। तत्र गुरुदेवस्य रवीन्द्रनाथठाकुरस्य सान्निध्ये भारतीयसंस्कृतेः मानवप्रेम्णः च महतीं शिक्षां प्राप्नोत्। तस्याः उच्चशिक्षा इङ्ग्लैण्डदेशे आक्सफोर्डविश्वविद्यालये सम्पन्ना।

जवाहरलालनेहरुः बहुधा स्वतन्त्रतायै आन्दोलनं कुर्वन् कारागारमगच्छत्। कारागारात् सः इन्दिरायै अनेकपत्राणि प्रेषितवान्। एतानि पत्राणि 'पुत्र्याः कृते पितुः पत्राणि' इति नाम्ना पुस्तकरूपेण प्रसिद्धानि सन्ति। तेभ्यः ज्ञायते यत् नेहरुः स्वपुत्रीं विदुषीं दूरदर्शिनीं ऊर्जस्वलां च द्रष्टुमैच्छत्।

इन्दिरायाः एते गुणाः प्रसिद्धाः सन्ति। स्वमातुः कमलानेहरुतः सत्यस्य शुद्धान्तःकरणस्य च शिक्षामलभत। बाल्यकाले एव तया 'वानरसेना' इति नाम्नी बालकानां सङ्घटना कृता।

तस्याः विवाहः फिरोजगान्धिना सहाभवत्। तौ दम्पती स्वाधीनतान्दोलने कारागारं गतवन्तौ। 1960 तमे ख्रिस्ताब्दे तस्याः पतिः स्वर्गमगच्छत्।

लालबहादुरशास्त्रिणः मृत्योरनन्तरं सा भारतस्य 'प्रधानमन्त्री' अभवत्। तत्पदमङ्गीकृत्य सा देशसेवायां सर्वभावेन संलग्ना जाता। अधिकोषाणां राष्ट्रियकरणं भूतपूर्वराज्ञां विशिष्टाधिकाराणां समाप्तिः तेषां नैजधनदानस्य (प्रिवीपर्स) अन्तः भूमिसम्पत्योः सीमानिर्धारणं चेत्यादीनि कार्याणि तस्याः महत्त्वम् उद्भासयन्ति। बङ्ग्लादेशस्य मुक्तिसङ्ग्रामे भारतीयसेनां प्रेष्य तया अपूर्वसाहसं कृतम्। भारतस्य सहयोगेनैव बङ्ग्लादेशः स्वतन्त्रः जातः। सा जीवनपर्यन्तं भारतस्य कल्याणाय निर्धनानामुत्थानाय च प्रयत्नमकरोत्। दरिद्रतामपनय इति तस्याः उद्घोषणासीत्।

1984 तमस्य ख्रिस्ताब्दस्य अक्टूबरमासे एकत्रिंशद्दिनाङ्के सा एकस्य स्वरक्षकस्यैव गोलिकाभिः वीरगतिं प्राप्नोत्।

सर्वे जनाः तां 'शान्तिदूती' इति रूपेण श्रद्धया स्मरन्ति। तस्याः समाधिस्थलं शक्तिस्थलमिति नाम्ना प्रसिद्धमस्ति।

## शब्दार्थाः

| | | | | | |
|---|---|---|---|---|---|
| अनेकधा | — | कई बार | अधिकोषः | — | बैंक |
| कोटिजनैः | — | करोड़ों लोगों के द्वारा | सान्निध्ये | — | पास में |
| ऊर्जस्वलानि | — | तेजस्वी/तेजपूर्ण | उद्भासयन्ति | — | प्रगट करते हैं |
| सर्वभावेन | — | पूर्णरूप से | अपनय | — | दूर करो/हटाओ |
| अङ्गीकृत्य | — | स्वीकार करके | अवहन् | — | ले जाते थे |
| अतीताः | — | भूतकाल की | उद्घोषणा | — | नारा |

## अभ्यासः

**1. एकपदेन उत्तरं लिखत —**

क. इन्दिरायाः भाषणानि कीदृशानि आसन्?

ख. इन्दिरायाः उच्चशिक्षा कुत्र अभवत्?

ग. नेहरुः स्वपुत्रीं कथं द्रष्टुमैच्छत्?

घ. इन्दिरा कुत्र भारतीयसेनां प्रेषितवती?

ङ इन्दिरायाः का उद्घोषणा आसीत्?

**2. एकवाक्येन उत्तरं लिखत —**

क. दिवङ्गतापि का अस्माकं कृते वर्तमानेवास्ति?

ख. इन्दिरायाः जन्म कदा अभवत्?

ग. इन्दिरायाः जन्म कुत्र अभवत्?

घ. जवाहरलालनेहरुः किं कुर्वन् कारागरमगच्छत्?

ङ. इन्दिरायाः समाधिस्थलं केन नाम्ना प्रसिद्धमस्ति?

**3. रिक्तस्थानानि पूरयत —**

क. .................. इन्दिरायाः पिता आसीत्।

ख. सर्वे ..................... तत्रागच्छन्।

ग. तया .................. नाम्नी बालकानां सङ्घटना कृता।

घ. ....................... सहयोगेन बङ्ग्लादेशः स्वतन्त्रः जातः।

ङ. सर्वे जनाः तां .................. इति रूपेण स्मरन्ति।

**4. नामोल्लेखपूर्वकं समासविग्रहं कुरुत —**

क. पुष्पमालाः
ख. देशभक्तेः
ग. सीमानिर्धारणम्
घ. वीरगतिम्

**5. नामोल्लेखपूर्वकं सन्धिविच्छेदं कुरुत —**

क. दर्शनमनेकधा
ख. स्वतन्त्रतान्दोलनस्य
ग. तत्रागच्छन्
घ. दरिद्रतामपनय
ङ. द्रष्टुमैच्छत्

**6. अधोलिखितशब्दान् आधृत्य वाक्यरचनां कुरुत —**

क. कृते
ख. समाप्य
ग. कुर्वन्
घ. सह
ङ. अङ्गीकृत्य

**7. उचितं योजयत —**

| | अ. | ब. |
|---|---|---|
| क. | इन्दिरायाः जन्म | वानरसेना |
| ख. | इन्दिरायाः पतिः | जवाहरलालनेहरुः |
| ग. | इन्दिरायाः माता | फिरोजगान्धिः |
| घ. | इन्दिरायाः पिता | कमलानेहरुः |
| ङ. | बालकानां सङ्घटना | प्रयागनगरे |

**8. ''इन्दिरागान्धिः'' इति विषयमवलम्ब्य संस्कृते दशवाक्यानि लिखत।**

**9. भिन्नप्रकृतिकं शब्दं चिनुत —**

क. इन्दिरा, पार्वती, अहिल्या, लक्ष्मीबाई।
ख. अक्टूबरमासः, अगस्तमासः, चैत्रमासः, जूनमासः।
ग. जलसेना, वानरसेना, थलसेना, वायुसेना।
घ. प्रधानमन्त्री, वित्तमन्त्री, रक्षामन्त्री, महामन्त्री।

**योग्यताविस्तारः —**

- इन्दिरायाः जीवनवृत्तं पठत।
- स्वतन्त्रभारतस्य प्रधानमन्त्रिणां नामानि क्रमानुसारं लिखत।

*गुणाः पूजास्थानं गुणिषु न च लिंग न च वयः।*